# अभिनवकाव्यालंकारसूत्रे विरोधमूलकालंकाराः

संदीप कुमार मिश्रः*

अलंकाराणां मूलाधारनिर्देशः सर्वप्रथमं भामहेनैव कृतः तथा च वक्रोक्त्यलंकारः सर्वालंकाराणां मूलाधारो मतः। यथा–

**सैषा सर्वैव वक्रोक्तिरनयार्थो विभाव्यते।**
**यत्नोऽस्यां कविना कार्यः कोऽलंकारोऽनया बिना।।**[1]

दण्डी तु वक्रोक्तेः स्थानेऽतिशयोक्तिं प्रायुङ्क्त। एतदतिरिक्तं सः सर्वविधासु वक्रोक्तिषु प्रायशः श्लेषसम्पर्कमप्यंगीचकार। आचार्यो वामनः स्वीयग्रन्थे आधिक्येन सादृश्यमूलालंकाराणामेव चर्चामकरोत् तथा च तत्मूलमुपमाममन्यत।[2] सर्वादौ अधिकतमालंकाराणामेकाधिक सामान्याधाराणां चर्चा रूद्रटेन कृता। सः सकलालंकारान् चतुर्धा विभाजितवान्–[3]

1. वास्तवमूलकालंकारः, 2. औपम्यमूलकालंकारः
3. श्लेषमूलकालंकारः, 4. अतिशयमूलकालंकारः।

एवमेव प्रो0 त्रिपाठिमहाभागेन बाह्यालंकाराश्चतुर्धा विभाजिताः तथा च साकल्येन अष्टादश अलंकारास्तेन स्वीकृताः।[4] तत्प्रतिपादितविभागस्य चत्वारो मूलाधारा निम्नवत्सन्ति– 1. सङ्घटनाश्रिताः 2. विरोधमूलकाः 3. औपम्यमूलकाः 4. वृद्धिमूलकाः। राधावल्लभमतानुसारम्– अन्यथाकरणं, छाया, जातिरतिशयश्चेमें चत्वारोऽलंकाराः सङ्घटनाश्रिताः, **अपह्नुतिर्विरोधः, असंगतिः, विषमः, द्वन्द्वं तानव इतीमे षड्लंकाराः विरोधमूलकाः सन्ति**। उपमा–रूपकोत्प्रेक्षा– दीपकालंकारास्तेन औपम्यमूलककोटौ निर्धारितास्तया च नादानुवृत्ति– यमक– श्लेष– लयालंकारास्तेन वृत्तिमूलकवर्गे स्वीकृताः। यथा–

**अन्यथाकरणं छाया जातिश्चातिशयस्तथा।**
**इमे चत्वार एव स्युराद्याः सङ्घटनाश्रिताः।**
**अपह्नुतिर्विरोधश्चासङ्गतिर्विषमं तथा।**
**द्वन्द्वं च तानवं च स्युर्वर्गे विरोधमूलके।**
**उपमा रूपकं चैव चोत्प्रेक्षा दीपकं यथा**
**इमे चत्वार एव स्युर्वर्गे चौपम्यमूलके।।**
**नादानुवृत्तिर्यमकं श्लेषश्चापि लयस्तथा।**
**एते सन्ति च चत्वारोऽलंकारा वृत्तिमूलकाः।।**[5]

**विरोधमूलकालंकाराः**

विरोधमूलकालंकारविवेचन प्रसंगे सर्वादौ विरोधालंकारस्य लक्षणं प्रस्तूयते– **''एकस्मिन् धर्मिणि विरूद्धधर्मप्रतीतिर्विरोधः''[6]।**

आचार्यो वामनः 'विरूद्धभासत्वं विरोध'[7] इत्युक्त्वा विरोधाभासत्वमेव विरोधम् अमन्यत्। विरोधोऽयं द्विविधः– प्रथमस्तत्र यत्र आपाततः विरोधप्रतीतिर्भवति किन्त्वविरोधे पर्यवसानं भवति। द्वितीयस्तत्र यत्र आपाततः अविरोधप्रतीतौ सत्यां विरोधस्थापनं भवेत्। अतः विरोधालंकारे सर्वत्र विरोधस्य समाधानं न भवति। एष विरोधोऽविरोधो वा एकवस्तुनि भवति। मम्मटेन विरोधालंकारो दशविधः अंगीकृतः।[8] एष्वेव समस्त जगतां विरोधः विश्राम्यति। काव्य– नाट्यान्यकलाशिल्पादिदृष्ट्याऽयं विरोधालंकारः पदगतः, चरित्रगतः, वाक्यगतः, प्रकरणगतः प्रबन्धगतश्च भवितुमर्हति। अत्र पदगतविरोधः ऋग्वेदस्य कितवसूक्तेन व्याख्यातः–

**नीचा वर्तन्ते उपरि स्फुरन्त्यहस्तासो हस्तवन्तं सहन्ते।**
**दिव्या अंगारा इरिणे न्युप्ता शीताः सन्तो हृदयं निर्दहन्ति।।**[9]

चरित्रगतविरोधस्य प्रकरणगतविरोधस्य चोदाहरणरूपेण त्रिपाठिमहाभागः उत्तररामचरित–नाट्यकाव्यस्य पद्यम् उदाहरत्–

**अयि कठोर यशः किल ते प्रियम्**
**किमयशो ननु घोरमतः परम्।**
**किमभवद् विपिने हरिणीदृशः**
**कथय नाथ कथं वत मन्यसे।।**[10]

अस्मिन् पद्ये भवभूतिः पूर्व चरित्रगतविरोधं प्रत्यपादयत्, तन्मतानुसारं रामः, यस्य यशोऽतिप्रियं सः निश्चितमेव, अपयशस्करं कर्म अकरोद्, यत्

* शोधच्छात्रः, रा0सं0सं0 लखनऊ परिसरः, लखनऊ

तच्चरित्रात् सर्वथा विरूद्धम् अस्ति, तथा चान्तिमपङ्क्तिषु सः प्रकरणगतं विरोधं प्रादर्शयत्, यत्र वासन्ती, या रामस्य चरित्रस्य गुणान् गायति, किन्तु साकस्माद् रामस्य निन्दां कर्तुं प्रवर्तते– एषा घटना रामं प्रति वासन्त्याः प्रकरणगत– विरोधोऽस्ति।

प्रबन्धगत–विरोधं विशदयन् राधावल्लभमहाभागः ईदृश प्रबन्धान् उत्तमोत्तमान् अकथयत्– ये विरोधमूलकाः, विरोधगर्भाः विरोधावसानाश्च भवन्ति। त्रिपाठिमतानुसारमभिज्ञानशाकुन्तलनाटकं विरोधलंकारप्रधाना रचनाऽस्ति। तन्मतेन भवभूतिरपि विरोधालंकारप्रयोगे सिद्धहस्तोऽस्ति। राधावल्लभमतानुसारं यस्मिन् खण्डकाव्ये, प्रबन्धकाव्ये वा लघुकाव्ये यावान् विरोधः स्यात् तन्महाकवीनां दृष्टौ तावदेवोत्तमं स्यात्।

**असंगतिरलंकारः**

विरोधालंकार निरूपणानन्तरमसंगतिनामकः विरोधमूलकोऽलंकारो विवेच्यते–**''संगतेरभावोऽसंगतिः''**[11]इत्यसंगतेर्लक्षणं कृतम्। अर्थात् संगतेरभाव एव असंगतिः, अत्र संगतेरभिप्रायः संश्लेषस्तथाऽसंगतिरसंश्लेषं व्यनक्ति। त्रिपाठिमतानुसारं– ''यस्मिन् धर्मिणि यो धर्मो भवितव्यः यदि सः तत्र अविद्यमानः अन्यत्र विद्यमानोऽस्ति, तर्हि स एव असंगतिं प्रकटयति''।

अस्मिन् सन्दर्भे त्रिपाठिमहाभागः काव्यालंकारसूत्रस्य पद्यद्वयम् उदाहरति, प्रथमं तावत्–

**पीतं पानमिदंत्वयाऽद्यदयिते मत्तं ममेदं मनः,**
**पत्राली तवकुटमेन रचिता रक्ता वयं मानिनि।**
**त्वं तुंगस्तनभारमन्थरगतिर्गात्रेषु मे वेपथुः**
**त्वन्मध्ये तनुता ममाधृतिरहो मारस्य चित्रागतिः।।**[12]

द्वितीयं च

**सा बाला वयमप्रगल्भमनसः, सा स्त्री वयं कातराः**
**सा पीनोन्नतिमत्पयोधरयुगं धत्ते सखेदा वयम्।**
**साक्रान्ता जघनस्थलेन गुरूणा गन्तुं न शक्तावयम्।**
**दोषैरन्यजनाश्रयैरपटवो जाताः स्म इत्यद्भुतम्।।**[13]

उपर्युक्त–पद्यद्वये ध्यातव्यमिदं यदिमे द्वे पद्योदाहरणे वामनः विरोधालंकारान्तर्गतं मन्यते, तद्विपरीतं त्रिपाठिमहाभागोऽत्र असंगत्यलंकारं मन्यते, वामनस्य च मतेन असहमतिं प्रकटयति। अलंकाररत्नाकरे शोभाकरमित्रः असंगतिं दिक्कालव्यापिनीम् अमन्यत, तथा च तस्याः अष्टौभेदान् प्रत्यपादयत्।[14]अभिनवकाव्यालंकारसूत्रकार, शोभाकरमित्रेण सहमतिं प्रकटयति, तथा च स्वीय–ग्रन्थे इमानष्टौ भेदान् उदाहरत्। पात्रगत– प्रकरणगत– प्रबन्धगत– भेदेन अयमसंगत्यलंकारस्त्रिविधो भवति।[15]अयं गीतिकाव्येषु प्रायः कवेः स्वदेशकालसमीक्षणं प्रस्तौति। आचार्यस्त्रिपाठि महाभागः असंगत्युदाहरणरूपेण ज्ञानकवेर्गजलकाव्यस्यैकां पङ्क्तिम् उदाहरति–

**''मनुष्यस्यान्तरोव्याधिर्वहिर्भैषज्यविज्ञानम्।**
**पटः किं तन्तुभिः सिद्ध्येदितस्तानस्ततो वानम्''।।**[16]

त्रिपाठिमतानुसारमुपर्युक्तत्रिविधासंगतेः सर्वोत्तममुदाहरणम्– भगवदज्जुकौमिति प्रहसनमस्ति।

**अपह्नुतिरलंकारः**

प्राच्याचार्याणां मतेन प्रकृतमुपेयं निषिध्य उपमानस्य सिद्धेः स्थापनैव अपह्नुतिः। आचार्यो वामनः –**''समेन वस्तुनाऽन्यापलोपोऽपह्नुति''** रिति अपह्नुतेर्लक्षणं विद्यते। अर्थात् समानवस्तुना उपमानेन अन्यस्य (उपमेयस्य) अपलापोऽपह्नुतिरस्ति। मम्मटोऽप्युक्तमतेन सहमतिं प्रकटयति।[17]एषां प्राच्याचार्याणां मतेन अपह्नुतिः साधर्म्यमूलकोऽलंकारः। अभिनवकाव्यालंकारसूत्रेऽपह्नुतेर्लक्षणंकृतम्–**''अपह्नुतिर्निषेधेन स्थापना वस्तुतत्त्वस्य''**–[18]अर्थात् निषेधपूर्वकं वस्तुतत्वस्थापनम् अपह्नुतिः।

**पुराणमित्येव न साधु सर्वं, न चापि काव्यं नवमित्यवद्यम्।**
**सन्तः परीक्ष्यान्यतरद्भजन्ते, मूढः परप्रत्ययनेयबुद्धिः।।**[19]

अत्र पुराणमात्रे साधुत्वबुद्धिं निविध्य परीक्षणेन यत् साधुः सिध्येत् तस्य स्थापना कृताऽस्ति।

अपह्नुतिरेवा वाच्यव्यंग्यभेदेन द्विविधाऽस्ति।[20] व्यंग्याया अपि सादृश्ये परिणतिः क्वचिद्भवेत् क्वचिन्न। यथा–

**अंगारप्रखरैः करैः कवलयन्नेतन्महीमण्डलम्।**
**मार्तण्डोयमुदेति केन पशुना लोकेशशाटीकृतः।।**[21]

अत्र सूर्यचन्द्रयोर्न किमपि सादृश्यम्। विरहिदृष्ट्या चन्द्रं निषिध्य सूर्यस्य स्थापना कृता। क्वचित्तु केवलं निषेध एवापह्नुतिर्भवति, अन्यस्य स्थापना स्यान्नवा स्यात्। यथा–

**निर्दयं विरौम्यहं न कोऽपि वृणोति माम्।**
**मामके हि भारते कीदृशी स्वतन्त्रता।।**[22]

अस्मिन् वचने प्रकृतस्वतन्त्रतायाः निषेधः शब्दवाच्यो नास्ति, अपितु प्रत्याय्योऽस्ति। नेयं वास्तविकी स्वतन्त्रता, अस्याः प्रतीतेः पर्यवसायित्वेन एषाऽपह्नुतिः।

इत्थं प्रकारेण अपह्नुतिः क्वचिन्निषेधेनापि भवति क्वचिच्च अपह्नवेनापि भवति। अतः एवैषा द्विविध निषेधमूलाऽपह्नवमूला च। उभयोर्भेदयोर्निषेधो वा अपह्नवो वा वाच्यमुखेन वा व्यंग्यमुखेन वा प्रस्तूयते। एवं प्रकारेण अपह्नुतिश्चतुर्विधा भवति। एषां चतुर्णामपि वाक्यगतत्वेन प्रकरणगतत्वेन प्रबन्धगतत्वेन च मुख्यतस्त्रैविध्याद् अपह्नुतिर्द्वादशविधा भवति।एषां विवेचनं तत्र सम्बद्धग्रन्थ एव द्रष्टव्यम्। ग्रन्थकारमत्या विद्वद्भिर्यया जीवनेऽपह्नुतेर्व्याप्तिरंगीक्रियते, तथैव काव्येऽप्यस्याः व्याप्तिर्वन्दनीया भवति।

**विषमालंकारः**

प्रो0 त्रिपाठिमहाभागः **''असमानः संयोगो विरूपकार्योत्पत्तिर्विषमम्''**–[23] इतिरूपेण विषमालंकार लक्षणं निरूपयति। अर्थादसमानसंयोगः विरूपकार्यस्योत्पत्तिश्च विषमालंकारः। स च द्विविधः– 1. असमानकार्यस्य निरूपकः, 2. विरूपकार्योत्पत्तेश्च निदर्शकः। पुनरयं वाक्य– प्रकरण– प्रबन्धभेदेन च त्रिविधः। प्रथमप्रकारस्य वाक्यगतस्य उदाहरणं रघुवंशे, यथा–

**क्व सूर्यप्रभवोवंषः क्वचाल्पविषया मतिः।**
**तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्।।**[24]

अथ वाक्यगत– विरूपकार्योत्पत्तिं निरूपयति– यस्य प्रामाणिकता स्वीकरणीया तामुपेक्ष्य तिरस्कृत्य अस्वीकरणीय प्रामाणिकतायाः अंगीकरणमेव विरूपकार्योत्पत्तिः। एवमेव प्रकरणगत– प्रबन्धगतः भेदांश्चापि ग्रन्थकारस्त्रिपाठिमहाभागः स्वग्रन्थे प्रत्यपादयत्। अभिनवकाव्यालंकारसूत्रकारमतानुसारं विरोधालंकारे तु समाधानं सम्भवति, किन्तु विषमे नैव। एष एवोभयोर्मूलभेदः। त्रिपाठिमहाभागः विषमस्य द्विभेदविषयक मम्मटमतेन सहमतिं न प्रकटयति। सः कथयति– मम्मटः यत् कर्तुः क्रियाफलस्य अनवाप्त्यनर्थावाप्तिभेदाद् द्विप्रकारकं विषमं मन्यते, तन्नास्मदभीष्टम्। वस्तुतस्तयोरन्तर्भावः इष्यमाणविरूद्धाप्तिरूपे विषादने भवति।

**द्वन्द्वालंकारः**

द्वन्द्वलक्षणं निरूपयन् राधावल्लभो दिशति–**''अन्यायनिवारणाययुद्धप्रक्रिया द्वन्द्वम्''**[25] अर्थात् अन्यायस्य निवारणायकृता या युद्धस्य प्रक्रिया तत् द्वन्द्वं भवति। द्वन्द्वमिदं मनोगतत्वात् समाजगतत्वात् राष्ट्रगतत्वाद् विश्वगतत्वाच्च सर्वत्रैव व्याप्नोति। युगपद् भासमानमिदं द्वन्द्वं पदगतं पदार्थगतं वाक्यार्थगतं प्रकरणगतं च भवति। अस्य स्पष्टीकरणाय त्रिपाठिमहाभागः स्वीयहिमालयलहर्याः पद्यम् उदाहरत्–

**अमी वृक्षं वृक्षं दृढमिह समालिङ्ग्य सुदृढा**
**जनास्तद्रक्षायै हिमगिरिसुतास्ते व्यवसिताः।**
**इमे सन्नद्धाः स्वानहमहमिकाभिः परिकरान्**
**निबध्यारात् कृत्वा परिसर इह व्यूहरचनाम्।।**[26]

अत्र वृक्षं वृक्षमित्यावृत्या दृढं सुदृढाचेति क्रियाविशेषणेन, विशेषणेन च कविर्हिमालयस्य वनस्पति– सम्पदः संरक्षणाय प्रवर्तमानं ''चिपको आन्दोलनम्'' असूचयत्। एवमेव 'अभिज्ञानशाकुन्तलमिति नाटकस्य– ''कृताभिमर्शामनुमन्यमान":[27] पद्यं प्रकरणगत द्वन्द्वस्य श्रेष्ठमुदाहरणमस्ति।

राधावल्लभः द्वन्द्वविषमयोर्भेदं स्पष्टीकुर्वन् कथयति– असमानसंयोगेन विरूपकार्यस्य उत्पत्तौ सत्यां विषमालंकारो भवति। द्वन्द्वे तु युद्धाय असमानयोद्धृणामेव सज्जा न भवति। अत्र विरूपकार्यस्य उत्पत्तिरपि न भवति। एवमेव विषमालंकारे द्वन्द्ववद् युयुत्सा न भवति। एष एव अनयोरूभयोर्भेदः।

**तानवालंकारः**

द्वन्द्वादनन्तरं तानवालंकारस्य लक्षणं क्रियते– **''वैयक्तिके सामूहिके वा चित्ते द्वन्द्वोत्थं कर्षणं तानवम्''**[28] अर्थाद् वैयक्तिक वा सामूहिके चित्ते द्वन्द्वजनितो यस्तानस्तदेव तानवम्। आधुनिक साहित्ये इदं तानवमत्यधिकं प्रसिद्धमस्ति। प्राच्य महाकवयः स्वीयरचनासु तानवस्य विशदं निरूपणमकुर्वन्। यथा उत्तररामचरिते–

**हा हा देवि स्फुटति हृदयं ध्वंसते देहबन्धः**
**शून्यं मन्ये जगदविरतज्वलामन्तर्ज्वलामि।**
**सीदन्नन्धे तमसि विधुरो मज्जतीवान्तरात्मा**
**विष्वङ् मोहः स्थगयति कथं मन्दभाग्यः करोमि।।**[29]

अयं तानवालंकारश्चित्ते कर्षणं तानमिव जनयति, अत एवायं तानः इति कथ्यते। अत्र जिजीविषालंकारः प्रच्छन्नरूपेण व्याप्नोति। अत्र राधावल्लभः वाच्यगत– प्रकरणगत– प्रबन्धगतभेदात् तानवस्य त्रीन् भेदान् अकल्पयत्।।[30]

इत्थं त्रिपाठिमहाभागः अभिनवकाव्यालंकारसूत्रे विरोधमूलकालंकाराणां प्रतिपादनमकरोत्।

**सन्दर्भ –**

1 काव्यालंकार – 2/85
2 ''तन्मूलं चोपमेति"– का0 सू0 पृ0 137
3 संस्कृत वाङ्.मय का वृ0 इति0(का0 शा0 खण्ड) पृ0 479
4 अभिनवकाव्यालंकारसूत्रम् 2/6/1
5 अभि0 का0 सू0 पृ– 86
6 अभि0 का0 सू0 2/6/6
7 का0 सू0 4/3/12
8 काव्यप्रकाश 10/सू0 166
9 अभि0 का0 सू0 (रमाकान्तपाण्डेय) पृ0 247
10 उ0 रा0 च0– 3/37
11 अभि0 का0 सू0 2/6/7
12 का0 सू0 4/3/12
13 तदेव
14 अभि0 का0 सू0 पृ0 114
15 तदेव
16 तदेव (रमाकान्तपाण्डेयः) पृ0 259
17 का0 प्र0 10/145
18 अभि0 का0 सू0 2/6/8
19 तदेव पृ0 115
20 तदेव पृ0 116
21 तदेव पृ0 117
22 तदेव
23 तदेव 2/6/9
24 रघुवंश 1/2
25 अभि0 का0 सू0 2/6/10
26 अभि0 का0 सू0 पृ0 123
27 अभि0 शा0 5/21
28 अभि0 का0 सू0– 2/6/11
29 उ0 रा0 च0 – 3/38
30 अभि0 का0 सू0– पृ0 124